# विजयोत्सवः

## ।। छात्रपठनसहायः ।।

**[ FOR SSLC STUDENTS ]**


Team prepared

Balakrishnan K.K
KPMSM HSS,Arikulam
Koyilandy

Raveendran K
MJHSS, Elettil
Thamarassery.

Dr.T.K.KrishnaKumar
MIMHSS,Perode
Nadapuram


2011

## अध्यापकेभ्यः

नूतनपाठपुस्तकमाधारीकृत्य कानिचनपठनप्रवर्तनानि अत्रायोजितानि। सर्वेषां छात्राणां विशिष्य निम्न स्तरीयाणामुपकाराय भवेदेतदिति मन्यामहे। एतत् केवलं मार्गदर्शनाय एव परिकल्पितः। पियग्रूप् टीचिङ् रूपेण एवास्य विनियोगः कार्यः।अस्मिन् प्रतिपातिदानि कार्याणि कक्ष्यायाः पूर्वमेव छात्राध्यापकं बोधनीयम्। छात्रैरेव कक्ष्या चालनीया। संस्कृताध्यापकः निरीक्षकरूपेणैव भवितव्यः। अस्य निरन्तरपरिशीलनेन सर्वेभ्यो उन्नतश्रेणिं प्राप्तुं शक्यत इति आशास्महे।

## एककम् १

| | |
|---|---|
| पाठस्यनाम - | अभित्तौ चित्रकर्म। |
| व्यवहाररूपम् - | कथा। |

प्रवर्तनम् १ संश्लिष्टपदचयनम्।
प्रवर्तनम् २ समस्तपदावगमः।
प्रवर्तनम् ३ चित्रं निरीक्ष्य सम्भाषणलेखनम्।
प्रवर्तनम् ४ आत्मनेपदपरस्मैपदविवेचनम्।
प्रवर्तनम् ५ द्विकर्मकधातूनां प्रयोगावगमः।
प्रवर्तनम् ६ विशेषविभक्तेः प्रयोगः।
प्रवर्तनम् ७ सूचनानुसारेण कथालेखनम्।

प्रवर्तनम् १ संश्लिष्टपदचयनम्।

पदच्छेदविवेचनाय प्रथमं प्रवर्तनं कक्ष्यायाम् आयोजयति। पाठभागं सम्यक् पठित्वा संश्लिष्टपदानां चयनाय निर्दिशति। छात्राः चितानि अवतारयन्ति। ततः सन्धिच्छेदं कृत्वा लिखन्ति। अवतरणानन्तरं पाठपुस्तके दत्तैः पदच्छेदैः सह तुलना कार्या। उचितानि टिप्पणीपुस्तके लिखन्ति।

उदा-: (सन्धिरूपाणि - मातृका )

| | | | |
|---|---|---|---|
| तदैव | पितुर्मित्रस्य | पुत्रमसूत | अकारयच्च |
| तमेवमवदत् | वणिगस्ति | भर्त्सयन्नासीत् | व्यनाशयच्च |
| मूषिकश्शेते | एतच्छ्रुत्वा | तूष्णीमतिष्ठत् | सुवर्णेनैकं |
| तमेवमपृच्छत् | प्रथितोऽभूत् | त एव | सञ्चयमप्यकुरुत |

एतादृशपदानां सन्धिविच्छेदः छात्रैः करणीयः

**प्रवर्तनम् २ – समस्तपदावगमः।**

छात्राध्यापकः पञ्चषाणां पदानां विग्रहवाक्यानि श्यामफलके लिखति।

उदा-ः

| | |
|---|---|
| वणिजः कर्म | जनानां पन्था । |
| सञ्चारस्य पन्था | ग्रामस्य पन्था । |
| राज्ञः पन्था | चतुर्णां पथानां समाहारः । |
| काष्ठानि वहन्ति इति | महान् च असौ धनिकः च। |

एतादृश विग्रहितपदानां समस्तपदलेखनं/एकपदलेखनं छात्रैः करणीयः

पाठभागात् समस्तपदानि समाहृत्य छात्राः वदन्ति। छात्राध्यापकः श्यामफलके लिखति। अपरिचितानि पदानि छात्राः टिप्पणीपुस्तके लिखन्तु।

**प्रवर्तनम् ३ चित्रं निरीक्ष्य सम्भाषणलेखनम्।**

निर्देशः चित्रनिरीक्षणम्। पञ्चवाक्यानि लेखनीयानि। कथापात्राणां नामानि दातव्यानि। सप्तककाराणां यथोचितप्रयोगः कार्यः



चित्रं १ चित्रं २ चित्रं ३ चित्रं ४

**प्रवर्तनक्रमः।** - छात्राः चित्रनिरीक्षणं कुर्वन्ति। कथापात्राणां नामानि प्रत्यभिजानाति। प्रश्नोत्तररूपेण छात्राः सम्भाषणं कुर्वन्ति। छात्राध्यापकः श्यामफलके त्रुटिं विना तत् लिखति। अनन्तरं सम्भाषणं टिप्पणिपुस्तके छात्राः लिखन्ति।

**प्रवर्तनम् ४ आत्मनेपदपरस्मैपदविवेचनम्।**

छात्रान् चतु:संघान् करणीयम्।संघे द्वि छात्रौ भवितव्यौ। एकैकस्य संघस्य एकैकां खण्डिकां दातव्यम्। ततः खण्डिकावाचनाय निर्दिशतु। वाचनानन्तरं खण्डिकातः उद्धृत्य क्रियापदानि टिप्पणिपुस्तके लेखनीयम्। प्रतिसंघैः सञ्चितानि क्रियापदानि छात्राध्यापकः श्यामफलके लिखति। तेषां विशेषता का इति चिन्तनाय प्रेरयति।

| **परस्मैपदी** | **आत्मनेपदी** |
|---|---|
| आसीत् | असूत |
| अकारयत् | प्रातिष्ठत |
| व्यनाशयत् | अयाचत |
| अतिष्ठत् | अलभत |
| अक्रीणात् | अकुरुत |
| अकरोत् | |
| प्रायच्छत् | |
| प्राविशत् | |
| अपृच्छत् | |

**प्रवर्तनम् ५ द्विकर्मकधातूनां प्रयोगावगमः।**

छात्राध्यापकः वदति यद् एकस्मिन् वाक्ये साधारणतया एकः कर्म भवेत्। यथा-

बालकः पुस्तकं **पठति**।

अत्र बालकः कर्तृपदं पुस्तकं कर्मपदं पठति क्रियापदं च भवति। कदाचन केचन धातूनां प्रयोगे कर्मद्वयं भवेत्। तादृशाः क्रियाः द्विकर्मकक्रियाः इति ज्ञायन्ते। यथा

माता **पुत्रं विद्यालयं** नयति।

द्विकर्मकधातूनां पट्टिका अपि प्रदर्शयतु।

## द्विकर्मकधातूनां पट्टिका।

| द्विकर्मकधातु: | क्रिया | |
|---|---|---|
| दुह् | दोग्धि | കറക്കുന്നു |
| याच् | याचते | യാചിക്കുന്നു |
| पच् | पचति | വേവിക്കുന്നു |
| दण्ड् | दण्डयति | ശിക്ഷിക്കുന്നു |
| रुध् | रुणद्धि | ബന്ധിക്കുന്നു |
| पृच्छ् | पृच्छति | ചോദിക്കുന്നു |
| चि | चिनोति | ശേഖരിക്കുന്നു |
| ब्रूञ् | ब्रूते | പറയുന്നു |
| शास् | शास्ति | ഉപദേശിക്കുന്നു |
| जि | जयति | ജയിക്കുന്നു/നേടുന്നു |
| मुष्ण् | मुष्णाति | മോഷ്ടിക്കുന്നു |
| मन्थ् | मथ्नाति | കടഞ്ഞെടുക്കുന്നു. |
| नी | नयति | നയിക്കുന്നു/കൊണ്ടുപോകുന്നു |
| हृञ् | हरति | അപഹരിക്കുന്നു/പരിഹരിക്കുന്നു. |
| कृष् | कर्षति | ആകർഷിക്കുന്നു. |
| वह् | वहति | വഹിക്കുന്നു. |

മേൽപറഞ്ഞ ധാതുക്കളും അവയുടെ അർഥം വരുന്ന ധാതുക്കളും ദ്വികർമകധാതുക്കൾ എന്നറിയപ്പെടുന്നു. ഇവ ക്രിയാപദങ്ങളായി വരുന്ന വാക്യങ്ങളിൽ മാത്രമേ രണ്ട് കർമങ്ങൾ ഉണ്ടായിരിക്കുകയുള്ളു.

## ।। द्विकर्मकवाक्यानि ।।

| | |
|---|---|
| १ | सः विशाखिलं मृतं मूषिकम् अयाचत। |
| २ | माता महिषीं पयो दोग्धि। |
| ३ | पाचकः गोधूमान् पायसं पचति। |
| ४ | पिता पुत्रं धर्मं ब्रूते। |
| ५ | मातुलः भागिनेयं नगरं नयति। |
| ६ | तक्षकः पीठं ग्रामं वहति। |
| ७ | देवाः अमृतं क्षीरनिधिम् अमथ्नन् |
| ८ | माता दधि नवनीतं मथ्नाति। |

अस्मिन् चार्ट् पत्रे रेखाङ्कितपदौ कर्मौ भवतः। तस्मात् मुख्यं कर्म विविच्य छात्राः टिप्पणिपुस्तके लिखन्तु।

| |
|---|
| പ്രധാനകർമം കണ്ടെത്തുന്നതെങ്ങിനെ? |
| തന്നിരിക്കുന്ന ക്രിയയുമായി ബന്ധപ്പെട്ട് ആരെ/എന്തിനെ എന്ന് ചോദിക്കുമ്പോൾ കിട്ടുന്ന ഉത്തരമായിരിക്കും സാധാരണഗതിയിൽ ആ വാക്യത്തിലെ പ്രധാനകർമം |

ഉദാ -: सः विशाखिलं मृतं मूषिकम् अयाचत। ഇവിടെ എന്തിനെ യാചിച്ചു എന്ന് ചോദിക്കുമ്പോൾ ലഭിക്കുന്ന ഉത്തരമാണ് ഈ വാക്യത്തിലെ പ്രധാനകർമം.

ഇതുപോലെ മറ്റ് വാക്യങ്ങളിൽനിന്നും പ്രധാനകർമം കണ്ടെത്തുക

### प्रवर्तनम् ६ विशेषविभक्तेः प्रयोगः।

बहिः शब्दयोगे पञ्चमी इति छात्राध्यापकः श्यामफलके लिखति। अर्थं च कथयति। बहिः शब्दः पञ्चम्यन्तेन पदेन प्रयोक्तव्यः। अनन्तरं बहिश्शब्दयुक्तानि पञ्चवाक्यानि श्यामफलके लिखति।अर्थं च कथयति। बहिश्शब्दस्य पञ्चम्यन्तपदस्य च अधो रेखा दातव्या।

कूपात् बहिः द्रोणी वर्तते।
नालिकयाः बहिः जलं स्रवति।
बालाः गृहाद् बहिः क्रीडन्ति।
स्थाल्याः बहिः अन्नं मा क्षिपन्तु।
उद्यानाद् बहिः यानानि तिष्ठन्ति।

अनेन प्रकारेण नूतनानि पञ्चष वाक्यानि लेखनीयानि।

कक्ष्या प्रवर्तनम्( त्रुटिसंशोधनाय)

छात्राध्यापकः पञ्चवाक्यानि श्यामफलके लिखति। लिखितेषु वाक्येषु पञ्चमी विभक्तिप्रयोगः न दातव्यः। वाक्यानाम् उचितप्रयोगः टिप्पणिपुस्तके लेखनाय निर्दिशतु। लिखितानि वाक्यानि क्रमशः पठन्तु। समीचीनप्रयोगः श्यामफलके लिखतु।

| अनुचितं वाक्यम् | उचितं वाक्यम् |
|---|---|
| सोमदत्तपुत्रः नगरस्य बहिः अगच्छत्।<br>छात्राः कक्ष्यया बहिः तिष्ठन्ति।<br>जोसफः गोष्ठतलस्य बहिः तिष्ठति।<br>यात्रिकाः यानस्य बहिः तिष्ठन्ति। | |

**प्रवर्तनम् ७ सूचनानुसारेण कथालेखनम्।**

छात्राध्यापकः श्यामफलके सूचनाः लिखति। यथा -ः

पादपः-खगः-वसति- क्रोडरः सर्पः- अण्डानि- खादति- दुःखिता - उपायः- कर्षकः -स्नानघट्टे- धनसञ्चिका- स्तापयति- स्नानम्- खगः -स्वीकरोति- डयते- क्रोडरः - निक्षिपति-कर्षकः - दण्डेन- सर्पः -हन्ति - धनसञ्चिका - स्वीकरोति- सन्तुष्टः खगः - सपरिवारं- अवसत्।

छात्राः सूचनाः टिप्पणिपुस्तके लिखन्तु। छात्राध्यापकः केचन निर्देशाः ददाति।

निर्देशाः -

| |
|---|
| सूचना सश्रद्धं पठनीयम्। |
| अर्थग्रहणं करणीयम्। |
| सूचनाः पूर्णवाक्यरूपेण परिवर्तनीयम्। |
| कथापात्राणां नाम दातव्यम्। |
| भूतकालप्रयोगमपि आवश्यकम्। |
| कथायाः सन्देशः अन्तिमे दातव्यः। |
| कथायाः उचितं शीर्षकं दातव्यम्। |

लिखिताभ्यः कथाभ्यः उत्तमां कथां कक्ष्यायाम् अवतारयतु। अवतरणसमय एव छात्राध्यापकः श्यामफलके तत् लिखतु। छात्राः स्वटिप्पणिपुस्तके तत् लिखन्तु।

मूल्यनिर्णयः

१ सप्तककारानुपयुज्य यावच्छक्यं प्रश्नावलिः निर्मातु।

२ सन्धियुक्तपदानाम् अकारादि पट्टिकाम् आरचयतु।

३ समस्तपदानां तेषां विग्रहरूपाणां च पट्टिकां निर्मातु।

४ Refe: Textbook page: 1**0,11,12**

त्वं वैश्यपुत्रः खलु। अतः वाणिज्यं कुरु। सः दरिद्रेभ्यः स्वजातीयेभ्यः वाणिज्यार्थं मूलधनं प्रददाति। - इति प्रस्तावस्य इदानींतनकाले साधुतामधिकृत्य कक्ष्यायां चर्चां करोतु लिखित्वा अवतारयतु।

പ്രവർത്തനം- അടിവരയിട്ട വാക്യങ്ങൾ ശ്രദ്ധാപൂർവം വായിക്കുക.ഓരോ വാക്യത്തെയും വിശകലനം ചെയ്യുക. നിങ്ങളുടെ അഭിപ്രായങ്ങൾ ഗ്രൂപ്പിൽ ചർച്ചചെയ്ത് ക്രോഡീകരിച്ച് ക്ലാസിൽ അവതരിപ്പിക്കുക.

.........&&&&&&.........

## एककम् २

| | |
|---|---|
| पाठस्यनाम | - वृक्षरोपणविधयः |
| व्यवहाररूपम् | - सम्भाषणम्। |

प्रवर्तनम् १ सन्धियुक्तपदानां चयनम्।
प्रवर्तनम् २ समस्तपदानां निर्धारणं विग्रहलेखनं च।
प्रवर्तनम् ३ अव्ययचयनम्।
प्रवर्तनम् ४ विशेषविभक्तिप्रयोगः।
प्रवर्तनम् ५ सम्भाषणरचना।
प्रवर्तनम् ६ टिप्पणि/उपन्यासलेखनम्।

**प्रवर्तनम् १ सन्धियुक्तपदानां चयनम्।**

अक्षराणां संयोग एव सन्धिः। यथा -

सन्धियुक्ताक्षराणां ज्ञानाय अध्यापकः एवम् उदाहरणानि प्रदर्शयतु।

| | |
|---|---|
| अ/आ + अ = आ | अ/आ + ओ = औ |
| अ/आ + इ/ई = ए | क् + क = क्क |
| अ/आ + उ/ऊ = ओ | क् + ज = ग्ज |
| अ/आ + ए = ऐ | ट् + अ = ड |

अनन्तरं पाठभागात् सन्धियुक्तपदानां चयनाय निर्दिशतु। छात्रैः यथा निर्दिश्यते तथा श्यामफलके लिखतु। अत्र वाक्यसंशोधनाय अपि अवकाशः छात्रेभ्यो दातव्यः।

मातृका -

| | | |
|---|---|---|
| कांस्कान् | सुहृदश्च | स्वास्त्यस्तु |
| विरचितोऽयम् | तैरेव | तच्च |
| प्रातश्च | वृक्षयोर्मध्ये | पुनर्दर्शनमस्तु |

सङ्घे चर्चां कृत्वा उपरिदत्तानां पदानां सन्धिच्छेदनाय प्रयत्नः करणीयः

एवं विश्लेषितपदानां सन्धिकार्यमपि कर्तुं प्रयत्नः करणीयः। मातृका अधः दीयते।

| आरभ्य + एव — आरभ्यैव |
|---|
| परिचायनम् + एव + अस्य + एककस्य |
| पुरस्कारेण + आदृतस्य |
| नमः + भवते |
| ग्रन्थे + अस्मिन् |
| नामके + अध्याये |
| इति + आदयः |
| छिन्नमूलस्य + उपरि |

**प्रवर्तनम् २ समस्तपदानां निर्धारणं विग्रहलेखनं च।**

പരസ്പരബന്ധം സൂചിപ്പിക്കുന്ന വിഭക്തിമുതലായവ വിട്ട് ഒന്നിലധികം പദങ്ങൾ ഒന്നിച്ച് ഒറ്റപ്പദമാകുന്നതാണ് സമാസം. ബന്ധസൂചകമായ വിഭക്തിമുതലായവചേർത്ത് ഘടകപദങ്ങളെക്കൊണ്ടുതന്നെ സമാസത്തിന്റെ അർഥം പറയുവാൻ ഉപയോഗിക്കുന്ന പദസമൂഹമാണ് വിഗ്രഹവാക്യം.

--- പ്രക്രിയാഭാഷ്യം. പു. 602

ഉദാ -: पितुः पिता – पितामहः । (समस्तपदम्)
देशान्तरम् – अन्यः देशः (विग्रहवाक्यम्)

एतादृशानि पदानि पाठभागात् समाहृत्य पट्टिकाम् आरचनीयम्।

| विग्रहवाक्यम् | समस्तपदम् /एकपदम् |
|---|---|
| | |

समस्तपदानि -

स्नानानुलेपनम् बालवृक्षः आमूलाग्रम् काण्डरोप्यः ......... etc. । इतरेभ्यः पाठभागेभ्यः अपि समस्तपदानि समाहृत्य पदकोशः निर्मातव्यः।

**प्रवर्तनम् ३ अव्ययचयनम्।**

| |
|---|
| ലിങ്ഗം വചനം വിഭക്തി മുതലായവ നിമിത്തം രൂപഭേദം വരാത്തതും ദ്രവ്യവാചികളല്ലാത്തതുമായ ശബ്ദങ്ങളാണ് അവ്യയങ്ങൾ. ––– പ്രക്രിയാഭാഷ്യം. പു. 229. |

उदा-: नमः। स्वस्ति। यदा-तदा। किमर्थम्। सह। अपि। कियत् । सम्यक्। अपूर्णक्रियाः अपि अव्ययानि भवितुम् अर्हन्ति। ते तुमुन् अन्तम् क्त्वान्तम् ल्यबन्तम् इति त्रिधा विभक्तः।

| तुमुन्नन्तम् | क्त्वान्तम् | ल्यबन्तम् |
|---|---|---|
| ज्ञातुम्। | पठित्वा । | प्रविश्य। |
| द्रष्टुम् । | स्थित्वा । | निमील्य। |

इतरेभ्यः पाठभागेभ्यः अपि एतादृशानि अव्ययानि समाहृत्य अव्ययकोशः निर्मातव्यः।

**प्रवर्तनम् ४ विशेषविभक्तिप्रयोगः।**

नमः। स्वस्ति। स्वाहा । स्वधा। अलम्। वौषट् इत्येतानि अव्ययानि चतुर्थ्यन्तैः पदैः प्रयोक्तव्यानि।

| | |
|---|---|
| गुरवे | नमः। |
| प्रजाभ्यः | स्वस्ति। |
| अग्नये | स्वाहा। |
| पितृभ्यः | स्वधा। |
| भोजनाय | अलम्। |
| वासुदेवाय | वौषट्। |

एवम् अव्ययपदसहितानि वाक्यानि पाठभागात् सञ्चित्य लिखतु। लिखितेषु वाक्येषु अन्तर्भूतानि अव्ययानि कस्मिन् विभागे अन्तर्भवति इति सूचयतु।

**प्रवर्तनम् ५ सम्भाषणरचना।**

श्रद्धेयानि अंशानि

- अभिवादन प्रत्यभिवादनानि आवश्यकानि।
- सम्बोधनारूपाणि आवश्यकानि।
- सप्तककाराणामुपयोगः कार्यः।
- न्यूनातिन्यूनं पञ्चवाक्यानि लेखनीयानि।

Q 1 आधुनिकवृक्षरोपणपालनविधीनधिकृत्य कार्षिकाधिकारिणा सह सम्भाषणम्।

OR

सस्यसंश्लेषणविधीनधिकृत्य सुहृद्भिः समं सम्भाषणम्।

Q 2 कीटनाशकजैवविधीनधिकृत्य सम्भाषणरचना।

लिखितानि सम्भाषणांशानि कक्ष्यायामवतार्य स्खालित्यानि परिष्करणीयानि।

**प्रवर्तनम् ६ टिप्पणि/उपन्यासलेखनम्।**

वैयक्तिकप्रवर्तनमिदम्। गृहकार्यरूपेण कर्तुं शक्यते।

Q 1 वृक्षरोपणपालनविधीनधिकृत्य लघूपन्यासरचनायै छात्रान् निर्दिशतु।
सूचनाः - आमुखम् - क्षेत्रसज्जीकरणम् -रोपणयोग्याः वृक्षाः - रोपणविधिः - सेचनम् - वृक्षचिकित्सा - उपसंहारः

Q 2 कीटनाशकजैवविधीनधिकृत्य लघुटिप्पणीं लिखत।
सूचना - विविधाः कीटाः - रासनाशकोपायाः - तेषां गुणदोषाः - जैवकीटनाशकाः - तेषां गुणदोषाः।

**प्रवर्तनम् ७ प्रश्नोत्तरक्रीडा।**

संघरूपेण कार्यः। पाठभागं सम्यक् पठित्वा यावच्छक्यं प्रश्नावलिं आरच्य परस्परं पृच्छतु। मातृकाप्रश्नाः अत्र दीयते।

मातृकाप्रश्नाः

१ बृहत्संहिता केन विरचिता।

२ वृक्षरोपणविधिः कस्मिन् ग्रन्थे प्रतिपादितः।

३ आरामे रोपणीयाः वृक्षाः के?।

४ वृक्षाणां सेकविधिः कीदृशः?।

५ वृक्षाः देशान्तरं नीत्वा रोपयितुं शक्यते वा? कथम्?।

६ वृक्षादीनां रोगकारणानि कानि?।

७ रुग्णा; वृक्षाः कथं चिकित्सिता आसन्?।

८ रोपणसमये वृक्षयोर्मध्ये कियदन्तरमावश्यकम्?।

९ इदानीं सङ्करवृक्षाः रोप्यन्ते। पूर्वं तादृशरोपणमासीद्वा?।

१० वृक्षाणां रोपणे कालनियमः अस्ति किम्?।

११ बहूदके जायमानाः वृक्षाः के?

# गीतामृतम्

ശ്രീമദ്ഭഗവദ്ഗീതയിലെ 17 -ാം അധ്യായത്തിൽനിന്നും എടുത്തിട്ടുള്ള 10 ശ്ലോകങ്ങളാണ് ഗീതാമൃതം എന്നപേരിൽ പഠിക്കുവാനുള്ളത്.ശ്രദ്ധ, ആഹാരം, തപസ്സ് എന്നീ മൂന്നുകാര്യങ്ങളാണ് ഈ പാഠത്തിൽ ചർച്ച ചെയ്യപ്പെടുന്നത്.

അറിഞ്ഞോ അറിയാതെയോ ശാസ്ത്രവിധികൾ ലംഘിച്ച് ഓരോതരം പ്രവൃത്തികളിലേർപ്പെടുന്ന മനുഷ്യരുടെ ശ്രദ്ധ ഏതുതരത്തിലായിരിക്കും എന്ന ചോദ്യത്തിനുള്ള ഉത്തരമാണ് ശ്രീമദ്ഭഗവദ്ഗീതയിലെ 17 -ാംഅധ്യായം. ഒന്നാമത്തെ ശ്ലോകം പാഠഭാഗത്തിൽ ഉൾപ്പെടുത്തിയിട്ടില്ല.

പഠനപ്രവർത്തനങ്ങൾ:-

- श्रद्धात्रयमधिकृत्य लघूपन्यासलेखनम्।
- षड्रसयुक्तानां भोजयवस्तूनां नाम्नां पट्टिकाकरणम्।
- तेषां सात्विकादिषु कुत्र अन्तर्भाव इति टिप्पणीलेखनम्।
- निर्दिष्टानां श्लोकानां टिप्पणीलेखनम्।

ഉപന്യാസമെഴുതുമ്പോൾ ശ്രദ്ധിക്കേണ്ട കാര്യങ്ങൾ

**ശീർഷകം** ഉണ്ടായിരിക്കണം.

**ആമുഖം**

ആമുഖത്തിൽ എഴുതുവാൻ പോകുന്ന വിഷയം എന്താണ്, അതിന്റെ ആവശ്യകത, പ്രത്യേകത,സന്ദർ ം , സാമൂഹികപ്രസക്തി: ജീവനമൂല്യങ്ങൾ എന്നിവയെക്കുറിച്ചൊക്കെ സൂചിപ്പിക്കാവുന്നതാണ്.

**വിഷയാവതരണം**

പറയേണ്ടകാര്യങ്ങൾ അടുക്കും ചിട്ടയോടും കൂടി അവതരിപ്പിക്കണം. ആദ്യം പറയേണ്ടത് ആദ്യം എന്നക്രമത്തിൽ എഴുതണം.ഇല്ലെങ്കിൽ ആശയം വ്യക്തമാകുകയില്ല. പദങ്ങൾ ലളിതങ്ങളാകണം.വി ക്തി,ലകാരങ്ങൾ തുടങ്ങിയവ ശ്രദ്ധാപൂർവം ഉപയോഗിക്കണം.

**കണ്ടെത്തലുകൾ/ പരിഹാരനിർദേശങ്ങൾ**

നിങ്ങൾക്കുതന്നിരിക്കുന്ന വിഷയം,സ്വന്തം അ ിപ്രായം അറിയിക്കുന്നതിനോപ്രശ്നങ്ങൾ

പരിഹരിക്കുന്നതിനോ ഉള്ളതാണെങ്കിൽ,പ്രസ്തുതവിഷയത്തിന്റെ ഗുണങ്ങളും ദോഷങ്ങളും വ്യക്തമാക്കണം. ദോഷങ്ങളാണ് അധികമെങ്കിൽ പരിഹാരമാർഗങ്ങൾ കൂടി നിർദേശിക്കണം.

**ഉപസംഹാരം**

തന്നിരിക്കുന്ന വിഷയത്തെ ജീവിതത്തിൽ/സമൂഹത്തിൽ എങ്ങിനെ കൂടുതൽ ഉപയോഗപ്പെടുത്തുവാൻ സാധിക്കും എന്ന നിർദേശത്തോടുകൂടി സമാപിക്കാം.

**श्रद्धात्रयमधिकृत्य लघूपन्यासलेखनम्।**

| शीर्षकम् | **श्रद्धात्रयम्।** |
|---|---|

आमुखम्

श्रीकृष्ण- अर्जुन संवादरूपेण रचिता भवति श्रीमद्भगवद्गीता। अस्मिन् उपदेशात्मके ग्रन्थे अष्टादश अध्यायाः सप्तशतश्लोकाः च सन्ति। एते श्लोकाः महाभारतस्य भीष्म पर्वणि अन्तर्भूता च।

विषयप्रवेशः

कौरवपाण्डवयुद्धस्य समारम्भे कौरवाणां सेनाबलनिरीक्षणाय उभयोः सेनयोः मध्ये रथं स्थापयितुं अर्जुनः श्रीकृष्णं प्रेरयति। तत्र स्थित्वा यदा सः कौरवसेनाम् अवलोकितवान् तदा शत्रुपक्षस्य पुरतः भीष्म पिता महादीन् दृष्ट्वा अर्जुनः शोकमोहा वुपगतवान्।अतः क्षात्रधर्मे युद्धे तं अभिप्रेरयितुं भगवता कृतंप्रयत्नमेव भगवद् गीता इति प्रथितः।अस्याः भगवद्गीतायाः सप्तदशे अध्याये श्रद्धात्रयमधिकृत्य अर्जुनस्य प्रश्नस्य उत्तररूपेण श्रीकृष्णः एवं वदति।

निगमनानि

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्विकी राजसी चैव तामसी चेति तां शृणु।।
सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः।।
यजन्ते सात्त्विका देवान् यक्ष रक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः।।

देहिनां स्वभावजा सा श्रद्धा सात्विकी राजसी तामसी चेति त्रिविधा एव भवति । श्रद्धा नाम मानसिकगुणः जीविवर्गस्य स्वभावानुसारी भवति। मानवानां प्रवृत्तेः गुणदोषौ तेषां श्रद्धामनुसरति। अतः श्रद्धानुसृतं भवति

मानवस्य प्रवृत्तिः प्रवृत्यनुसारं भवति तस्य श्रद्धा इति वक्तुं शक्यते। यस्य श्रद्धा सात्त्विकी भवति सः देवादीनां पूजां करोति। यस्य श्रद्धा राजसः भवति सः यक्षरक्षांसि यजन्तो। अन्ये तामसश्रद्धावन्तः जनाः प्रेतान् भूतगणांश्च आराधयन्ति।

उपसंहारः

एवं भगवद्गीतायां श्रद्धायाः त्रैविध्यम् तस्याः आहारेण सह सम्बन्धश्च सम्यक् प्रतिपादितः। ये तदनुसृत्य जीवन्ति ते नूनं सात्विकाः भवेत्।

**मूल्यनिर्णयः-**

१ षड् रसयुक्तानां भोज्यवस्तूनां पट्टिकां करोतु। तेषां सात्विकादिषु कुत्र अन्तर्भाव इति टिप्पणीं लिखतु।

२ अधोनिर्दिष्टानां श्लोकानां लघु टिप्पणीं रचयतु।

१.देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।।

२.अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।

३.मनः प्रसादः सौम्यत्त्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत् तपो मानसमुच्यते।।।

१ षड् रसयुक्तानां भोज्यवस्तूनां पट्टिकां करोतु। तेषां सात्विकादिषु कुत्र अन्तर्भाव इति टिप्पणीं लिखतु।

| मधुरः | अम्लः | लवणः | कटुः | तिक्तः | कषायः |
|---|---|---|---|---|---|
| कदलीफलम्<br>आम्रफलम् | तिन्त्रिणी<br>तक्रम् | लवणम् | मरिचिका<br>शुण्ठी | कारवेलम्<br>निम्बः | पूगः |

**२.१** श्रीकृष्ण- अर्जुन संवादरूपेण रचिता भवति श्रीमद्भगवद्गीता। अस्मिन् उपदेशात्मके ग्रन्थे अष्टादश अध्यायाः सप्तशतश्लोकाः च सन्ति। एते श्लोकाः महाभारतस्य भीष्मपर्वणि अन्तर्भूता च। अस्याः भगवद्गीतायाः श्रद्धात्रयविभागयोगो नाम सप्तदशे अध्याये १४ तमः श्लोकः भवति -

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।

ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।।इति।।

तत्र श्रद्धा त्रयविभागयोगे श्रद्धायाःआहारस्य च त्रैविध्यं उक्त्वा यज्ञस्य तपसः दानस्य च त्रैविध्यप्रकाशन अवसरे किं नाम शारीरिकं तप इति वदति तत्र भगवान् श्रीकृष्णः। *देवद्विज गुरुप्राज्ञपूजनं शौचमार्जवं ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते*। ब्राह्मा विष्णु महेश्वरादीनां देवानाम् आराधनं,वेदज्ञानां विशेषज्ञानां वयोवृद्धानां ज्ञान वृद्धानां च गुरुजनानां समादरणं, नित्यस्नानादि शारीरिकशुद्धिः,स्वभावे निष्क पटता, विद्याभ्यसनम् अहिंसा इत्येते शारीरिकं तप इति व्यवह्रियन्ते।

**२.२** श्रीकृष्ण- अर्जुन संवादरूपेण रचिता भवति श्रीमद्भगवद्गीता। अस्मिन् उपदेशा त्मके ग्रन्थे अष्टादश अध्यायाः सप्तशतश्लोकाः च सन्ति। एते श्लोकाः महाभारतस्य भीष्म पर्वणि अन्तर्भूता च। अस्याः भगवद्गीतायाः श्रद्धात्रयविभागयोगो नाम सप्तदशे अध्याये १५ तमः श्लोकः भवति -

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।इति।।

अनुद्वेगकरं वाक्यं- अस्माकं भाषणं श्रोतृणाम् उत्कण ाजनकं न भवेत्। तत्तु सत्यं प्रिय हितं स्व वेदाध्ययनपरं च भवेत्।तादृशं वाक्यं वाङमयतपसः उदाहरणं भवति। वाचा मित्रत्वमायाति वाचा एव आयाति शत्रुताम् इति सुभाषितः वचसः प्राधान्यं वर्णयति। तथा कालिदासस्य रघुवंशे अपि सूचितं मितं च सारं च वचो हि वाग्मिता इति।

**२.३** श्रीकृष्ण- अर्जुन संवादरूपेण रचिता भवति श्रीमद्भगवद्गीता। अस्मिन् उपदेशात्मके ग्रन्थे अष्टादश अध्यायाः सप्तशतश्लोकाः च सन्ति। एते श्लोकाः महाभारतस्य भीष्म पर्वणि अन्तर्भूता च। अस्याः भगवद्गीतायाः श्रद्धात्रय विभागयोगो नाम सप्तदशे अध्याये १६ तमः श्लोकः भवति -

मनः प्रसादः सौम्यत्त्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत् तपो मानसमुच्यते।।

मनःप्रसादः मनो नाम सङ्कल्पविकल्पात्मिका अन्तः करणवृत्तिः। सौम्यत्त्वं मनसः प्रसाद जनकं भावविशेषम्। मौनम् आत्मविनिग्रहः इन्द्रियसंयमः भावसंशुद्धिः चित्तशुद्धिः च मानसं तपः उच्यते।

जीवने औन्नत्यसम्पादनाय श्रद्धात्रयः तथा त्रिविध तपश्चर्याः च अत्यन्तमपेक्षते। तयोर्मध्ये मानसतपोवृत्ति विशेषस्थानमर्हति।

**१ त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।**
**सात्विकी राजसी चैव तामसी चेति तां शृणु।।**

१ श्रद्धा कतिविधा भवति? — १ श्रद्धा त्रिविधा भवति।
२ श्रद्धा कीदृशा भवति? — २ श्रद्धा स्वभावजा भवति।
३ कस्य त्रिविधा श्रद्धा भवति? — ३ देहिनां त्रिविधा श्रद्धा भवति
४ सा स्वभावजा। सा का? — ४ सा श्रद्धा।
५ श्रद्धा कस्य स्वभावजा भवति? — ५ श्रद्धा देहिनां स्वभावजा भवति।
६ सा स्वभावजा। सा का? कस्य स्वभावजा ? — ६ सा श्रद्धा। देहिनां स्वभावजा ।

**२ सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।**
**श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः।।**

१ श्रद्धा कीदृशा भवति? — १ श्रद्धा सत्वानुरूपा भवति।
२ पुरुषः कीदृशः भवति? — २ पुरुषः श्रद्धामयः भवति।
३ सत्वानुरूपा का? — ३ सत्वानुरूपा श्रद्धा।
४अस्मिन् श्लोके प्रयुक्तं सम्बोधनापदं ? — ४ भारत!

**३ यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।**
**प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः।।**

१ सात्विकाः किम् कुर्वन्ति? or सात्विकानां सविशेषता का? — १ सात्विकाः देवान् यजन्ते।
२ राजसाः किं कुर्वन्ति? or राजसानां सविशेषता का? — २ राजसाः यक्षरक्षांसि के यजन्ते।
३ तामसाः किम् कुर्वन्ति? or तामसानां सविशेषता का? — ३ तामसाः भूतप्रेतगणान् यजन्ते।
४ देवान् के यजन्ते? — ४ देवान् सात्विकाः यजन्ते।
५ यक्षरक्षांसि के यजन्ते? — ५ यक्षरक्षांसि राजसाःयजन्ते।
६ भूतप्रेतगणान् के यजन्ते? — ६ भूतप्रेतगणान् तामसाः यजन्ते।

**४ आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।**
**यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु।।**

१ आहारः कतिविधः? — १ आहारः त्रिविधः।
२ यज्ञः/तपः/ दानं कतिविधः? — २ यज्ञः/तपः/ दानं त्रिविधः।

४ आहारः कीदृशः भवति? ४ आहारः प्रियः भवति।

५ शृणु - अस्य लकारः कः? ५ लोट्।मध्यमपुरुष एकवचनम्।

**५ आयुस्सत्वबलारोग्यसुखप्रीतिविवर्धनाः**
**रस्याः स्निग्धाः स्थिरा हृद्या आहारा सात्विकप्रियाः।।**

१ सात्विकप्रियः आहारः कीदृशः? १ आयुस्सत्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धाः स्थिरा हृद्या आहारा सात्विकप्रियाः।।

२ रस्याः स्निग्धाः आहारा केषां प्रियाः भवति? २ सात्विकानाम्।

३ सात्विकप्रियस्य आहारस्य सविशेषता का? ३ आयुस्सत्वबलारोग्यसुखप्रीतिवर्धकं तत् रस्या स्निग्धा स्थिरा हृद्या च।

**६ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।**
**आहारा राजसस्येष्टा दुःखशोकामयप्रदाः।।**

१ रसः कति विधः? १ षड् विधः।

२ राजसस्येष्टाः आहाराः कीदृशाः? २ कट्वम्ललवणात्युष्ण तीक्ष्णरूक्ष विदाहिनः दुःखशोकामयप्रदाः आहारा राजसस्येष्टा।

३ दुःखशोकामयप्रदाःआहाराः केषां प्रियं भवति? ३ राजसानाम्।

४ तीक्ष्णरूक्षविदाहिनः आहाराः केषां प्रियं भवति? ४ राजसानाम्।

**७ यातयामं गतरसं पूति पर्युषितं च यत्।**
**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।।**

१ तामसप्रिं भोजनं कीदृशं भवति? १ यातयामं गतरसं पूति पर्युषितं उच्छिष्टममेध्यं च यद्भोजनं तत् तामसप्रियं भवति।।

२ यातयामं गतरसं च आहाराः केषां प्रियं भवति? २ तामसानाम्।

**८ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।**
**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।।**

१ शारीरिकं तपः कीदृशः भवति?

ब्रह्मा विष्णु महेश्वरादीनां देवानामाराधनं,वेदज्ञानां विशेषज्ञानां वयोवृद्धानां ज्ञान वृद्धानां च गुरुजना नांसमादरणं, नित्यस्ना नादि शारीरिक शुद्धिः, स्वभावे

निष्कपटता, विद्याभ्यसनम् अहिंसा इत्येते शारीरिकं तप इति व्यवह्रियन्ते।

९ **अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।**

१ वाङ्मयं तपः कीदृशः भवति?

अनुद्वेगकरं वाक्यं- अस्माकं भाषणंश्रोतृणाम् उत्कण ा जनकं न भवेत्। तत्तु सत्यं प्रियहितं स्व वेदाध्ययनपरं च भवेत्। तादृशं वाक्यं वाङमयतपसः उदाहरणम्।

१० **मनः प्रसादः सौम्यत्त्वं मौनमात्मविनिग्रहः।**
**भावसंशुद्धिरित्येतत् तपो मानसमुच्यते।।**

१ मानसं तपः कीदृशः भवति?

मनःप्रसादः सौम्यत्त्वं मनसः प्रसादजनकं भाव विशेषम्। मौनमात्म विनिग्रहः इन्द्रिय संयमःभावसंशुद्धिः चित्त शुद्धिः च मानसं तपःभवति।

# आयुर्दानं महादानम्

आयुर्वेदचिकित्सापद्धत्याः अष्टाङ्गानि एव अत्र प्रतिपाद्यः

ആയുർവേദത്തിനുപുറമെ യോഗശാസ്ത്രത്തിലും തന്ത്രശാസ്ത്രത്തിലുമൊക്കെ അഷ്ടാങ്ഗങ്ങളെക്കുറിച്ചുപ്രതിപാദിക്കുന്നുണ്ട്.

| योगशास्त्रे | तन्त्रशास्त्रे | आयुर्वेदे |
|---|---|---|
| यमः | ललाटः [1] | कायः |
| नियमः | हस्तौ [2] | बालः |
| आसनम् | उरः [1] | ग्रहः |
| प्राणायामः | पादौ [2] | ऊर्ध्वाङ्गः |
| प्रत्याहारः | जानू [2] | शल्यः |
| धारणा | | दंष्ट्रा |
| ध्यानम् | | जरा |
| समाधिः | | वृषः |

**आयुर्वेदग्रन्थाः**

ഭാരതത്തിൽ പ്രസിദ്ധങ്ങളായിട്ടുള്ള ഏതാനും ആയുർ വേദ ഗ്രന്ഥങ്ങൾ

| | |
|---|---|
| चरकसंहिता | धन्वन्तरी निघण्टु |
| सुश्रुतसंहिता | राजनिघण्टु |
| सहस्रयोगः | भैषज्यरत्नावली |
| अष्टाङ्गहृदयम् | माधवनिदानम् |
| अष्टाङ्गसंग्रहः | वैद्यचन्द्रोदयम् |
| अष्टाङ्गदर्शनम् | वैद्यजीवनम् |
| औषधनिघण्टुः | शाङ्गर्धरसंहिता |

**आयुर्वदस्य त्रयः स्तम्भाः** - हेतु , लिङ्गं , चिकित्सा ।

| | |
|---|---|
| हेतुः - | रोगकारणानि। |
| लिङ्गं - | रोगलक्षणानि। |
| चिकित्सा - | औषधप्रयोगः। |

Q आयुर्वेदचिकित्सापद्धतेः सविशेषता का?

आयुर्वेदचिकित्सापद्धत्यां रोगग्रस्तस्य शारीरिक मानसिक अवस्थाः समग्रतया परिगण्यन्ते।

Q शरीरे कति दोषाः सन्ति? Or शरीरजाः दोषाः के? Or पाञ्चभौतिके शरीरे वर्तमानाः दोषाः के?

पाञ्चभौतिके शरीरे वातपित्तकफाः च इति त्रयः दोषाः सन्ति।

രണ്ടാമത്തെ വിഭാഗത്തിലുള്ള മൂന്നുചോദ്യങ്ങളും ശ്രദ്ധിക്കുക. മൂന്നിനും കൂടി ഒരുത്തരമാണ് നൽകിയിരിക്കുന്നത്. അത് ശരിയാണ് എങ്കിലും ചോദ്യത്തിനനുസരിച്ച് ഉത്തരം എഴുതാൻ അറിഞ്ഞിരിക്കണം.

2.1 ശരീരത്തിൽ എത്ര ദോഷങ്ങൾ ഉണ്ട് എന്നാണ് ചോദ്യം. അതിനുത്തരമായി ആ വാക്യം പൂർണമായും എഴുതേണ്ടതില്ല. ഇപ്രകാരമാകാം അതിനുത്തരം. शरीरे **कति** दोषाः सन्ति? ഈ ചോദ്യത്തിൽ **कति** ആണ് Question Tag. അപ്പോൾ അതിനനുസരിച്ചുള്ള ഉത്തരം നൽകിയാൽ മതിയാകുന്നതാണ്.

| | |
|---|---|
| 2.1 शरीरे **कति** दोषाः सन्ति? | शरीरे **त्रयः** दोषाः सन्ति? |
| 2.2 शरीरजाः दोषाः **के ?** | वातपित्तकफाः शरीरजाः दोषाः। |
| 2.3 पाञ्चभौतिके शरीरे **वर्तमानाः दोषाः के**? | |
| पाञ्चभौतिके शरीरे वातपित्तकफाः च इति त्रयः दोषाः सन्ति। | |

Q आयुर्वेदे हेतुः लिङ्गं चिकित्सा इति त्रयः स्तम्भाः सन्ति। तेषां सविशेषता का?
हेतौ रोगस्यकारणानि लिङ्गे लक्षणानि चिकित्सायां औषधविज्ञानं च प्रतिपादितानि।

Q आयुर्वेदस्य प्राचीनतमत्वं कथं निर्णेतुं शक्यते?
अष्टाङ्गसंग्रह अष्टाङ्गहृदयाभ्यां आयुर्वेदग्रनथाभ्यां आयुर्वेदस्य अष्टाङ्गत्वं बौद्धकालादारभ्यसुप्रचलितमासीदिति सूचनाः लभ्यन्ते। वेदेषु अश्विनीकुमरौ इति वैद्यौ अधिकृत्य परामर्शाः विद्यन्ते।

Q आयुर्वेदचिकित्सापद्धत्यां किं परिगण्यन्ते?
आयुर्वेदचिकित्सापद्धत्यां रोगग्रस्तस्य शारीरिक मानसिकावस्थाः समग्रतया परिगण्यन्ते।

Q अरोगता इत्यनेन किम् उद्दिश्यते?
पाञ्चभौतिके शरीरे वातपित्तकफाः च इति त्रयः दोषाः सन्ति। एतेषां समत्वमेव अरोगता।

Q आरोग्यम् इत्यनेन किम् उद्दिश्यते? OR

Q *रोगस्तु दोषवैषम्यं रोगसाम्यमरोगता* इति वचनम् आधारीकृत्य का नाम **अरोगता** इति विशदयत।
पाञ्चभौतिके शरीरे वातपित्तकफाः च इति त्रयः दोषाः सन्ति। एतेषां समत्वमेव अरोगता। तदेव आरोग्यमित्युच्यते।

Q अधो लिखितान् अष्टाङ्गान् आधारीकृत्य लघु टिप्पणिं लिखत।

| | | | |
|---|---|---|---|
| कायचिकित्सा | बालचिकित्सा | ग्रहचिकित्सा | ऊर्ध्वाङ्गचिकित्सा |
| शल्यचिकित्सा | दंष्ट्रा चिकित्सा | जराचिकित्सा | वृषचिकित्सा |

[See TB: Page 35-38]

Q चरकसंहिता कस्य विभागस्य आधारग्रन्थः भवति?

Q कौमारभृत्यम् इत्यनेन किम् उद्दिश्यते?

Q काश्यपसंहितायाः सविशेषता का?

Q ग्रहचिकित्सायाः नामान्तरं किम्?

Q शल्यचिकित्सायाः प्रमाणिकग्रन्थः कः?

Q अगदतन्त्रं नाम किम्?

Q जरा चिकित्सा अथवा रसायनचिकित्सा किमर्थम् उपयुज्यते?

Q शरीरस्य तेजो वर्धकः चिकित्सा पद्धतिः कः?

[See TB: Page 35-38]

#Þ#Þ#Þ#Þ#Þ#Þ#Þ#Þ